# • शिव रात्रि पूजा



# • शिव रात्रि पूजा

सर्वाधिकार सुरक्षित

कृष्णम् वन्दे जगत् गुरुम्

विजयेश्वर पंचांग कार्यालय

Rs 20 00

प्रकाशक :-

**प्रेम नाथ शास्त्री**

*Printed at :*

**LUXMI PRINTING WORKS**
Lal, Kuan, Delhi-6

# शिवरात्रिपूजा

## शिवरात्रि के लिये कलश, नटू इत्यादि (वटुक) रखने का नकशा




**पूजा के लिये सामग्रीः–** दूध दही फूल तिल काण्ठगण सिन्दूर नारीवन (मौली) रत्नदीप चोंग, जंग के लिये चावल, पवित्र, दर्भ, नाबद, कालामिर्च, लोंग किशमिश (यदि पवित्र न मिले, तो उतने समय के लिये अनामिका ऊँगली में स्वर्ण की अँगूठी डाल कर रखें, अगर दर्भ न मिले तो दूर्वा यानि द्रमन घास प्रयोग में लायें) पूजा के स्थान पर बटुकनुट के पास ही ब्रह्मकलश बनाये–ब्रह्मकलश का चित्र ऊपर नकशे में देखें उस कलश पर एक लोटा रखिये, उस में विष्टर, पानी, फूल डाल कर रखें–कलश ईशानी कोन (उत्तरपूर्व कोन) पर बनायें वहाँ से क्रमशः सबवटुक नुटू डुलिजियाँ आदि दक्षिण की ओर आरियों पर पहले से ही सज्जा कर रखें, पूजास्थान को इस भावना से सजायें कि आज मैंने पार्वती सहित भगवान् शंकर को निमन्त्रित करना है, वटुकनाथ के दायें ओर अन्त में चोंग रखें, चोंग से जरा उत्तर की ओर दो कटोरियाँ (क्षेत्रफल रखें) जैसा कि हमने नकशे में दिखाया है–अब यजमान को चाहिये आसन पर पूर्व की ओर हाथ में फूल लेकर कलश पूजा आरम्भ करे–थोडे-थोडे फूल कलश पर डालते जायें और पढ़ते रहें–

ऊँ कारो-यस्य मूलं क्रम-पद-जठर-च्छन्द-विस्तीर्ण-शाखा, ऋक्-पत्रं सामपुष्पं यजुर्-उचित-फलः, स्यात्-अथर्वः प्रतिष्ठा । यज्ञच्छाया-सुशीतो द्विजगण-मधुपैः-प्रीयते यस्य नित्यं, शक्तिः सन्ध्या-त्रिकालं-दुरितभयहरः-पातु-नो वेद-वृक्षः।। मुक्ता-विद्रुम-हेमनील-धवल-च्छायै-र्मुखैस्त्रीक्षणै-युक्ताम्-इन्दु-निबद्ध-रत्न-मुकटां तत्त्वात्मवर्णात्मिकाम्। गायत्रीं वरदाभयां-कुशकरां शूलं कपालं गुणं शंखं चक्रम्-अथार-बिन्द युगलं हस्तै-र्वहन्तीं भजे।। आयातु वरदा देवी त्र्यक्षरा ब्रह्मवादिनी। गायत्री च्छन्दसां मातर्-ब्रह्म-योने-नमोस्तुते (तीन बार पढिये)।।

भद्रं-पश्येम-प्रचरेम, भद्रं-भद्रं वदेम शृणुयाम भद्रम्। तन्नो मित्रो वरुणो माम-हन्ताम्-अदितिः सिन्धुः, पृथ्वी उत द्यौः। अभि नो देवीरवसा, महः शर्मणा नृपत्नीः, अच्छिन्न-पत्राः सचन्ताम्। इहेन्द्राणीमु-पह्वये, वारुणानीं स्वस्तये, अग्नायीं सोमपीतये।। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्, पिपृतां नो भरीमभिः।। तयोर्-इत्-घृतवत्-पयो, विप्रा रिहन्ति धीतिभिः, गन्धर्वस्य ध्रुवे पदे। स्योना पृथिवि भवानृ-क्षरा-निवेशनी, यच्छाऽन्नः शर्म सप्रथः।। अतो देवा अवन्तु नो यतो विष्णु-र्विचक्रमे, पृथिव्या सप्त-धामभिः।। इदं विष्णु-र्विचक्रमे त्रेधा निदधे पदम्, समूढमस्य पांसुरे।। त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः, अतो धर्माणि धारयन्। विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पृशे, इन्द्रस्यः सखा। तत् विष्णोः परमं पदं सदा पश्यन्ति सूरयः, दिवीव चक्षुर-आततम्।। तत्-विप्रासो विपन्यवो जागृवांसः समिन्धते-विष्णोर्यत् परमं पदम्।। ऊँ गायत्र्यै नमः, ऊँ भूर्भुवः स्वः-तत्-सवितु-र्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् (तीन बार)

क्षेत्रपालों को अर्घ डालते हुये पढें:-अश्वमेधे घोराणामार्षम्।। ऊँ द्रष्ट्रे नमः उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः, ख्यात्रे नमः उपख्यात्रे नमो, नुक्शास्त्रे नमः, शृण्वते नमः, उपशृण्वते नमः, सते नमः असते नमो जाताय नमो, जनिष्यमानाय नमो, भूताय नमो, भविष्यते नमः, चक्षुषे नमः, श्रोत्राय नमो मनसे नमो, वाचे नमो, ब्रह्मणे नमः, शान्ताय नमः, तपसे नमः। भूतंभव्यं भविष्यत्-वषट्-स्वाहा नमः, ऋक्-साम-यजु-र्वषट् स्वाहा नमो, गायत्री त्रिष्टुष् जगती वषट् स्वाहा नमः। पृथिव्यन्तरिक्षं द्यौर्वषट् स्वाहा नमः। अन्नं कृषिवृष्टिः वषट् स्वाहा नमः, पिता पुत्रः पौत्रो वषट् स्वाहा नमः। प्राणो व्यानोऽपानो वषट्स्वाहा नमो, भूर्भवः स्वर्वषट् स्वाहा नमः।

यो विश्व-चक्षुर्-उत-विश्वतो मुखो विश्वतो हस्त, उत विश्वतस्पात्। सं बाहुभ्यां धमते संपतत्रै-र्द्यावापृथिवी जनयन् देव एकः।। ॐ आब्रह्मन्-ब्राह्मणो ब्रह्म-वर्चस्वी जायताम्-अस्मिन्-राष्ट्रे, राजन्य इषव्यः शूरो महारथो जायतां, दोग्ध्री धेनु-र्वोढा-नड्वान्-आशुः सप्ति-र्जिष्णू-रथेष्ठः, पुरन्धि्र-र्योषा, सभेयो, युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवतीर्नं ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।। कलश पर अर्घ चढाते हुये पढ़ें–"इषे त्वोर्जे त्वेति ब्रह्मणः–" इषे त्वोर्जे त्वा वायवः स्थो, पायवः स्थ देवो वः, सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे, आप्यायद्धव-मध्न्या देवभागं, प्रजावतीरन-मीवा-अयक्ष्मा मावस्ते न ईशत माघशंसः, परिवो रुद्रस्य हेति-र्वृणक्तु, ध्रुवा-अस्मिन्-गोपतौ स्यात् बह्वी-र्यजमानस्य पशून्-पाहि-यजमानस्य पशुपा असि, देवस्य त्वा सवितुः प्रसवे-श्विनोबाहुभ्यां पूष्णो हस्ताभ्यां-आदधे, गोषदसि प्रत्युष्ठं रक्षः, प्रत्युष्टरातिः प्रेयमागा–द्धिषणा बर्हिरुछ मनुना कृता, स्वधया वितष्टा उर्वन्तरिक्षं वीहीन्द्रस्य परिषू-तमसि माधो, मोपरि, परस्त ऋद्धया, स मा च्छेत्ता, ते मा रिषत् देवबर्हिः शतवल्शं विरोह सहस्रवल्शं विवयं रुहेम, आदित्या, रास्नासीन्द्राण्या सन्नहन्नं पूषा ते ग्रन्थिं ग्रथ्नातु, स ते मा स्थात्-इन्द्रस्य त्वा बाहुम्यां-उद्यच्छे बृहस्पतेस्त्वा मूर्ध्ना हरामि देवं गममसि, तदा हरन्ति कवयः, पुरस्तात्-देवेभ्यो जुष्टं-इह बर्हिर्-आसदे, वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारं-अय क्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः। मधुमत् घृतवत्-पिन्वमाना जीवा जीवन्तीर्-उपवः, सदेम, मातरिश्वानो घर्मोसि द्यौर्-असि पृथिव्यसि विश्वधाया परेण, धाम्ना हृनुतासि माह्वाः, सा विश्वायुः सा विश्वव्यचाः सा विश्वधाया हुतस्तोको हुतो, द्रप्सोग्नये बृहते नाकाय स्वाहा, द्यावा-पृथिवीभ्यां संपृच्यध्वं-ऋतावरी, ऊर्मिण मधुमत्तमा मान्द्राधानस्य सातयः, इन्द्रस्य त्वा भागं, सोमेना-तनत्-म्यदस्तम्-असि विष्णवे-विष्णो हव्यं रक्षस्वापो जागृत। महितृणां मवोस्तु द्युम्नं मित्रस्यार्यम्णः, दुराधर्ष वरुणस्य, नहि तेषाममाचन नाध्वसु वरणेषु ईशे रिपुर्-अघशंसः, यस्मै पुत्रासो अदितेः प्रजीवसे मर्त्याय ज्योति-यच्छन्त्य-जस्रम्-सोमानं स्वरणं कृणुहि ब्रह्मणस्पते, कक्षीवन्तं य औषजो यो रैवाण्यो अमीवहा वसुवित्-पुष्टिवर्धनः सनः सिषक्तु यस्तुरः मानः शंसो अररुषो धूर्तिः प्राणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते

अब प्रणीतपात्र में जो कलश के सामने दायें तरफ है, उस में तिल अक्षत पुष्प अर्घ और तीन मन्त्रों से तीन फूल डालते हुये पढ़ें–

सं वः सृजामि हृदयं संसृष्टं मनो अस्तु वः। (1) संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः (2) संयावः प्रियास्तन्वः सं प्रिया हृदयानि वः। आत्मा वो अस्तु सं प्रियः संप्रियास्तन्वो मम। (3) प्रणीतपात्र के दर्भ अथवा विष्टर से कलश और क्षेत्रपालों को छीटें देते हुये पढें–अग्नेर्-आयुर्-असि तस्य ते मनुष्या आयुष्कृतस्-तेन-अस्मै अमुष्मै आयु-र्धेहि। इन्द्रस्य प्राणः स ते प्राणं ददातु यस्य प्राणस्तस्मै ते स्वाहा, पितृणां प्राणास्ते ते प्राणन्ददतु येषा प्राणस्तेभ्यो वः स्वाहा, मरुतां प्राणास्ते ते प्राणन्ददतु येषां प्राणस्तेभ्यो वः स्वाहा। विश्वेषां देवानां प्राणास्तेते प्राणन्ददतु येषां प्राणस्तेभ्यो वः स्वाहा। प्राजापतेः प्राणः परमे-मेष्ठिनः प्राणस्तौ-ते प्राणं-दत्तां ययोः प्राणस्ताभ्यां वां स्वाहा।। यदऽसर्पस्-तत्सर्पिर्-अभवो-यत्-नवमैः तत्-नवनीतम् अभवो-मत्-अद्रि-यथा-तत्-घृतम्-अभवो।

घृतस्य धाराम्-अमृतस्य-पन्थामिन्द्रेण दत्तं प्रयन्तं मरुद्भिः। तत्त्वा विष्णुरन्वपश्यत्-तत्त्वेडा-गव्यैर्-अयत्। पावमामेन त्वा स्तेमेन गायत्र्या वर्तन्या पाशोवीर्येणोद्धराम्यसौ। बृहता त्वा रथन्तरेण त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसौ। अग्नेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवातवे जीवनस्याया असौ, देवा आयुष्मन्तस्ते-अमृतेना आयुष्मन्तस्तेषाम्-अयम्-आयुषा-आयुष्मान्-अस्त्वसौ। ब्रह्मायुष्मत्-तत्-ब्राह्मणैः-आयुष्मत्-तस्यायम्-आयुषा-आयुष्मान्-अस्तहौ। अग्निर्-आयुष्मान्-स वनस्पतिभिर्-आयुष्मान्-तस्यायम्-आयुषा-युष्मान्-अस्त्वसौ। यज्ञ आयुष्मान्-स-दक्षिणाभिः आयुष्मान्-तस्यायम्-आयुषा-आयुष्मान्-अस्त्वसौ। ओषधयः आयुष्मतीः-अद्भिर्-आयुष्मतीस्तासाम-अयम्-आयुषा-युष्मान्-अस्त्वसौ इमम्-अग्र-आयुषे वचसे कृधि तिग्ममो जो वरुण संशिशाधि। मातेवास्मा अदिते शर्मयच्छ विश्वेदेवा जरदष्टिर्यथासत्।। अश्विनो प्राणस्तौते प्राणं दत्तां तेन जीव, बृहस्पतेः प्राणः स ते प्राणं दत्तात् तेन जीव। मित्रावरुणयोः प्राणस्तौ ते प्राणं दत्तां तेन जीव अब पूजास्थान के सभी दिशाओं को अर्घ तिल अर्पण करते हुए पढें:– ये देवाः पुरः संदोग्निनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा, ये देवा दक्षिणात् सदोयमनेत्रा रक्षोहणस्ते नः पान्तु ते नोवन्तु तेभ्यः स्वाहा, ये देवाः पश्चात् सदो मरुत् नेत्रा रक्षोहणस्ते नः पान्तु ते नो वन्तु तेभ्यः स्वाहा। ये देवा उत्तरात् सदो मित्रावरुण नेत्रा रक्षोहणस्ते नः पान्तु ते नोवन्तु तेभ्यः स्वाहा। सभी सामग्री उपरिलिखित मन्त्रों से छिडकें

अपने आप को तिलक लगाते हुये पढ़ें–

अध्वर्योयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय। विश्वस्मै भूताय ध्रुबो अस्तु देवाः स पिन्वस्व घटवत्-देवयज्ञम्। अर्घफूल चढाते हुये पढें–इहैवैधि मा पच्योष्ठाः पर्वता इवाविचाचलत्। इन्द्र इहेव ध्रुवः-तिष्ठेह यज्ञमुधराय। दो दर्भ के तिनके अपने आसन के रूप में डालते हुये पढें–

इमम्-इन्द्रो--अदीधरत्-ध्रूवं-ध्रवेण हविषा हविः, तस्मै सोमो अधिव्रुत्-तस्मै उ ब्रह्मणस्पतिः (कलश को आसन डालते हुये पढें:–

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं, जगत् ध्रुवो राजा विशामसि। भूमि को तिलक फूल और अक्षत लगाते हुये पढें–

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पितृतां न भरीमभिः, (आकाश को)=बडित्था पर्वतानां क्षेत्रं बिभर्षि पृथिवि। प्रया भूमिं प्रवत्वति मह्ना जिनोषि महिनि–(कलश को)–निषुसीद गणपते गणेषु त्वामाहु-विर्प्रतमं कवीनाम्। न ऋते त्वक्रियते किंचनारे महामर्कं मघवन् चित्रमर्च। कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे। अनीकमस्य नमिनञ्जनासः पुराः पश्यन्ति निहित-मरतौ। अश्वपूर्वां रथमध्यां हस्तिनाद-प्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवीः जुषताम्। इयं शुष्मेभि-र्विसखा इवारुजत्-सानु-गिरीणान्त विश्वभिर्-ऊर्मिभिः। पारावतघ्नीम्-सुवृक्तिभिः-सरस्वतीम् आविवासेम धीतिभिः। कांस्यस्मितां हिरण्य-प्राकाराम्-आर्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्; पद्मे स्थितां पद्मवर्णां ताम्-इहोपह्वये श्रियम्। विश्वकर्मा-विश्वदेवो विश्व ज़ित विश्वदर्शितः। ते त्वा घृतस्य धारया श्रेष्ठाय समसूषत। ब्रह्मा देवानां पदवीः कवीनाम्-ऋषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृद्रणां स्वधितिः-वनानां सोमः पवित्रम् अत्येति रेभन्। प्रेतत् विष्णुः स्तवते वीर्येण मृगो न भीमःकुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्व-धिक्षियन्ति भुवनानि विश्वा। यो रुद्रो अग्नौ, योऽप्सु य ओषधीषु यो वनस्पतिषु। योरुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः।। अग्निमीडे पुरोहितं यज्ञस्य देवम्-ऋत्विजम्-होतारं रत्नधातमम्।। इषे त्वोर्जे त्वा वायवः स्थो पायवः स्थ देवो वः सविता प्रार्पयतु, श्रेष्ठतमाय कर्मणे।। अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि। शन्नो देवीर्-अभीष्टय आपो भवन्तु पीतये शंयोरऽभि-स्रवन्तु नः। आहं पितॄन् सुविदत्रां अवित्सि न पातञ्च विक्रमणंच विष्णोः बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः।। वषट्ते विष्णवास

आकृणोमि तन्मे जुषस्त्व शिपिविष्ट हव्यम्। वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः। फाल्गुणे शक्ति सहिताय चक्रिणे नमः, क्रियासहिताय दामोदराय नमः दुर्गायै नमः त्र्यम्बकपय नमः वरुणाय नमः यज्ञपुरुषाय नमः, अग्निष्वान्तादिभ्यः पितृगणदेवताभ्यो नमः।। प्रधा। रात्रीं प्रपद्ये जननीं सर्वभूत निवेशिनीम् भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम्।। संवेशिनीं सं यमनीं ग्रहनक्षत्रमालिनीम् प्रपन्नोहं शिवां रात्रीं भद्रे पारमशीमहि नमः कालरात्र्यै नमः तालरात्र्यै नमः राज्ञिरात्र्यै नमः शिवरात्र्यै नमः। यो रुद्रो अग्नौ य अप्सु य ओषधीषु यो वनस्पतिषु। यो रुद्रो विश्वाभुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः।। क्षेत्रस्य पतिना वयं हितेनेव जायमसि गामश्वं पोषयित्वा स नो मृडातीदृशे। द्वादश्यां देवीपुत्र हेरकनाथाय, त्रयोदश्यां देवीपुत्र वटुकनाथाय, त्रिपुरान्तकाय, भुतबलेभ्यः, वेतालराजाय अग्निवेताल राजाय, अग्निजिह्वाय, बहुखातकेश्वराय, करालाय कामाख्याय मंगलराजाय एकपादाय योगिनीबलेभ्यो, भीमरूपिणे विश्वक्सेनाय, तारकाख्याय, जयक्-सेनाय हाटकेश्वराय, तेजाय, राजराजेश्वराय चण्डाय समस्तशिवरात्रीयागदेवताभ्यः विष्णु पञ्चायतन-देवताभ्यः अभयंकारीदेव्यै क्षेमंकरीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये आनन्देश्वर भैरवाय तिलतण्डुलमात्रं दधिमधुमिश्रं ॐ नमो नैवेद्यं निवेदयामि नमः। (कलश पर फल अर्घ चढाते हुये पढें-) (1) हिरण्यगर्भः समवर्तनाग्ने भूतस्य जातः पतिर्-एक आसीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम- (2) यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव। ईशेयो अस्य द्विपदश्च-तुष्पदः कस्मै देवाय हविषा विधेम। (3) य ओजदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम (4) येन द्यौर्-उग्रा पृथिवी दृढा येन सुस्तम्मितं येन नाकम्। यो-अन्तरिक्षं विममेवरीयः कस्मै देवाय हविषा विधेम। (5) य इमे द्यावा पृथिवी तस्तभाने आधारय द्रोधसी रेजमाने। यस्मिन् नधि विततः सूर एति कस्मै देवाय हविषा विधेम। यस्येमे विश्वे गिरयो महित्वा समुद्रं रसया सहाहुः। दिशो यस्य प्रदिशः पञ्चदेवी कस्मै देवाय-हविषा विधेम। (6) आपो हयस्य-यन्महती विश्वम्-आयुः-गर्भं दधाना जनयन्तीर्-अग्निम्।। ततो देवानां निरवर्त-तासुर्-एकः कस्मै देवाय हविषा विधेम।। आ नः प्रजां जनयतु प्रजापति-धार्ता दधातु सुमनस्यमानः। संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु।। अर्चन्तस्वा हवामहे अर्चन्त समिधीमहि, अग्नेर-अर्चत ऊतये अर्चत प्रार्चत प्रियमेधसो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्णम्-अर्चत-अर्चत। इति।।

# ॐ नमः शिवाय

"ॐ नमः शम्भवाय च मयोभवाय च,

नमः शंकराय च मयस्कराय च, नमः शिवाय च शिवतराय च"

श्रद्धा से उच्चारण करते रहें। भद्रपीठ या थाली में **"सुजपुतलू"** अथवा **"पार्थिवेश्वर"** रखकर नारी कचलू अथवा **"खोसू"** से पात्र में जलधारा डालते हुये पढ़ें:-

**अस्य श्री आसन-शोधन-मन्त्रस्य मेरुपृष्ठ-ऋषिः सुतलं छन्दः कूर्मो देवता आसन-शोधने विनियोगः।**

पृथवीमाता को तिलक फूल चावल चढ़ाते हुये पढ़ें:-

**प्रींपृथिव्यै आधार-शक्त्यै समालभनं गन्धोनमः,अर्घोनमः, पुष्पं नमः।**

हाथ जोड़कर पढ़ें:-**पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता, त्वं च धारय मां देवि पवित्रं कुरु चासनम्।**

दर्भ के दो तिनके अनामिका अंगुलियों में रख कर गणेश जी का ध्यान करते हुये पढ़ें:-

**(1)शुक्लाम्बर-धरं विष्णुं शशिवर्णं चतुर्भु-जम्, प्रसन्न-वदनं ध्याये सर्व विघ्नोप-शान्तये। अभि-प्रीतार्थं-सिद्ध्यर्थं पूजितो यः सुरैर्-अपि, सर्व-विघ्न छिदे तस्मै गणाधि-पतये नमः।**

**(2)कर्पूर-गौरं करुणाव-तारं संसार-सारं भुजगेन्द्र-हारम्, सदा रमन्तं हृदयार-बिन्दे भवं भवानी-सहितं नमामि।**

**(3)गुरु-र्ब्रह्मा गुरु-र्विष्णु, गुरुः साक्षत्-महेश्वरः, गुरुर्-एव, जगत्-सर्व तस्मै श्री गुर-वे नमः, गुर-वे नमः, परम-गुर-वे नमः, परमेष्ठ- गुर-वे नमः, परमाचार्याय नमः, आदि-सिद्धिभ्यो नमः।**

दर्भ के दो तिनके पकड़कर अंगन्यास कीजियेः-

हृदय को दोनों हाथों से छूते हुये पढ़ें:- **ॐ यो रुद्रो अग्नौ हृदयाय नमः,** सिर

को स्पर्श:-**यो अप्सु य औषधीषु शिरसे स्वाहा,** चोटी को:-**यो वनस्पतिषु शिखायै वषट्** वस्त्रों को स्पर्श करते हुये पढ़ें:-**यो रुद्रो विश्वाभुवना विवेश-कवचाय हुम्।** नेत्रों को स्पर्श करते हुये:-**तस्मै रुद्राय नेत्राभ्यां वौषट्,** चुटकी मारते हुये पढ़ें:-**नमोअस्तु देवा अस्त्राय फट्।** चारों ओर तिल फेंकते हुये पढ़ें:- **अपसर्पन्तु ते भूता ये भूता भुवि संस्थिता:,ये भूता विघ्नकर्त्तार-स्ते नश्यन्तु शिवाज्ञया।** प्रणायाम करके हृदय और मुख को जल की छींटे देते हुये पढ़ें:-**तीर्थे-स्नेयं तीर्थम्-एव समानानां, भवति मान:, शंस्योर्-अरुरुषो धूर्तिः प्राणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते।**

अनामिका अंगुली पर पवित्र ऊपर की ग्रन्थि(पर्व) पर धारण करते हये पढ़ें:-

**वसो: पवित्रम्-असि शतधारं वसूनां पवित्रम्-असि सहस्रधारम्, अयक्ष्मा व: प्रजया संसृजामि रायस्पोषण बहुला भवन्ति।**

यजमान को तिलक लगाते हुये पढ़ें:-

**मन्त्रार्था: सफला: सन्तु पूर्णा: सन्तु मनोरथा: शतृणां बुद्धि-नाशोस्तु मित्राणाम्-उदयस्तव आयुर्-आरोग्यम्-ऐश्वर्यम्-एतत्-त्रितयम्-अस्तु ते जीव-त्वं शरद: शतम्।**

अपनी मध्यमा अंगुली से अपने आपको तिलक पुष्प लगाते हुये पढें:-

**परमात्मने पुरुषोत्तमाय पंच-भूतात्मकाय विश्वात्मने मन्त्र-नाथाय आत्मने नारायणाय-आधार-शक्त्यै समालभनं गन्धोनम: अर्धोनम: पुष्पं नम:।**

चोंग(दीप) को तिलक अक्षत और पुष्प चढ़ाते हुये पढ़ें:-

**स्वप्रकाशो महादीप: सर्वतस्तिमरा-पह:,प्रसीद मम गोविन्द दीपोयं परिकल्पित:।**

धूप को तिलक अर्घ पुष्प चढ़ाते हुये पढ़ें:-

**वनस्पति-रसो दिव्यो गन्धाढ्यो गन्ध उत्तम:, आह्वानं सर्वदेवानां धूपोयं प्रति-गृह्यताम्।**

सूर्यदेवता को निर्माल्य के थाल में अर्घ चावल फूल चढ़ाते हुये पढ़ें:-

दर्भ सहित कटोरी से शिवलिंग अथवा सञ्पुतलू पर जलधारा डालते हुये पढ़ें:-

**यत्रास्ति-माता, न पिता न बन्धुर्-भ्रातापि नो यत्र सुहृत्-जनश्च, न ज्ञायते, यत्र दिनं न रात्रि-स्तत्रात्मदीपं शरणं प्रपद्ये। आत्मने नारायणाय-आधार-शक्तये धूप-दीप संकल्पात्-सिद्धिर्-अस्त धूपो, नमः दीपो नमः।**

**ॐ तत्-सत्-ब्रह्म-अद्य तावत् तिथौ-अद्य, फाल्गुणमासस्य कृष्णपक्षस्य तिथौ-द्वादश्यां वासरा-नित्वायां महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवताभ्यः प्रजापतये ब्रह्मणे कलश-देवताभ्यः ब्रह्म, विष्णु-महेश्वर-देवताभ्यः चतुर्वेदेश्वराय सानुचराय मासपतये नारायणाय फाल्गुणे शक्ति-सहिताय चक्रिणे क्रिया-सहिताय गोविन्दाय दुर्गायै त्रयम्बकाय वरुणाय यज्ञ पुरुषाय अग्नि-ष्वातादिभ्यः पितृगण-देवताभ्यः भगवते भवाय देवाय उग्राय देवाय भीमाय देवाय ईशानाय देवाय ईश्वराय देवाय-महादेवाय, पार्वती सहिताय परमेश्वराय देवीपुत्राय-वटुकनाथाय कालरात्र्यै तालरात्र्यै राज्ञरात्र्यै शिवरात्र्यै समस्त-शिवरात्रि-देवताभ्यः धूपदीप संकल्पात्-सिद्धिर्-अस्तु धूपो नमः दीपो नमः।**

बायां यज्ञोपवीत रखकर तिल सहित पानी से पितरों को जल देते हुये सञपुतलू पर जलधारा डालते हुये पढ़ें:-

**समस्तमातापितृभ्यो द्वादश-दैवतेभ्यः पितृभ्यो धूपः स्वधा दीपः स्वधा,** सव्येन-दायें भुजा में यज्ञोपवीत धारण करके विष्टंर अथवा दर्भ के जल से पूर्ण खोसू या नारी कचलू में तिलक और पुष्प डालते हुये पढ़ें:-

**सं वः सृजामि हृदयंसंसृष्टं मनो अस्तु-वः। संसृष्टाः-तन्वः सन्तु वः। संसृष्टः प्राणोऽस्तु वः। सं या वः प्रिया-स्तन्वः सं प्रिया हृदयानि वः, आत्मा वो-अस्तु सं प्रियः संप्रियाः तन्वोमम।**

इसी खोसू के जल से सञ्पुलू अथवा शिवलिंग या पार्थिवेश्वर और सारे वटुक नाथ को जल की छींटे दर्भ के तिनकों अथवा विष्टर से देते हुये पढ़ें:-

**अश्विनोः प्राणः -तौ ते प्राणं दत्तां तेन जीव, मित्रा-वरुणयोः प्राणः -तौ ते प्राणं दत्तां तेन जीव बृहस्पतेः प्राणः स ते प्राणं ददातु तेन जीव, समस्त-शिवरात्रि-देवताभ्यः जीवादानं परिकल्पयामि नमः।**

अक्षत(चावल) सहित दर्भ के दो तिनके सीधे पकड़कर यह मन्त्र तीन बार पढ़ें:-

**ॐ भूः पुरुषम्-आवाहयामि नमः। ॐ भुवः पुरुषम्-आवाहयामि नमः। ॐ स्वः पुरुषम्-आवाहयामि नमः। (3)**

गायत्री मन्त्र तीन बार पढें:- **"ॐ भू र्भुवः स्वः तत्-सिवतुर्-वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्"। (3)**

यह मन्त्र भी तीन बार पढ़ें:-

**"ॐ तत्-पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्।(3)**

यह मन्त्र पढ़कर फिर से पढ़ें:-

**ॐ तत्-सत्-ब्रह्म अद्य तावत् तिथौ अद्य फाल्गुण मासस्य कृष्णपक्षस्य तिथौ महापर्वणि द्वादश्यां परतः त्रयोदश्यां वारान्वितायां, भगवतः भवस्य देवस्य, शर्वस्य देवस्य, पशुपतेः देवस्य, उग्रस्य देवस्य, भीमस्य देवस्य, ईशानस्य देवस्य, महादेवस्य पार्वती सहितस्य, परमेश्वरस्य देवीपुत्र वटुक-नाथस्य, कालरात्र्याः**

**तालरात्र्याः शिवरात्र्याः समस्त-शिवरात्रि-देवतानां अर्चाम् अहं-कारिष्ये, ॐ कुरुष्व।**

हाथ में पहले से पकड़े हुये दर्भ के दो तिनके निर्माल्य में छोड़कर, तिल सर्षप और जव को भी कन्धों पर से फेंके, अब शंकर की मूर्ति के सामने दर्भ के दो दो तिनके(दर्भ के अभाव में दो दो फूल) आसन के रूप में डालते हुये पढ़ें:-

**ॐ विश्वेश्वर महादेव राजराजेश्वरे-श्वर आसनं दिव्यम्-ईशान दास्येहं परमेश्वर, भगवतः भवस्य देवस्य, ईशानस्य देवस्य महादेवस्य पार्वती सहितस्य परमेश्वरस्य इदम्-आसनं नमः।**

चावल सहित दर्भ के दो तिनके अनामिका और मध्यमा अंगुली पर अंगूठे से दबा कर यदि घंटी आपके पास हो बायें हाथ से बजाते हुये पढ़ें:-

**भगवते भवाय देवाय, शर्वाय देवाय, पशुपतये देवाय-रुद्राय देवाय, भीमाय देवाय, ईशानाय देवाय, ईश्वराय देवाय, महादेवाय पार्वती-सहिताय, परमेश्वराय देवीपुत्र-वटुक-नाथाय, कालरात्र्यै समस्त-शिवरात्रि-देवताभ्याः युष्मान्-पूजयामि ॐ पूजय।**

चावलों को कंधों पर से फेंक कर दर्भ के पहले से रखे हुये दो तिनको को हाथ में ही रख कर नये चावल के दानों के सहित पकड़ कर पढ़ें:-

**भगवन्तं भवं देवं, शर्वं देवं, रुद्रं देवं, पशुपतिं देवं, उग्रं देवं, भीमं देवं, ईशानं देवं ईश्वरं देवं, महादेवं पार्वतीसहितं परमेश्वरं देवीपुत्र-वटुक-नाथं कालरात्री तालरात्री शिवरात्रि समस्त शिवरात्रि-देवता आवाहयिष्यामि, ॐ आवाहय।।**

भगवान् शंकर की मूर्ति पर फूल चढ़ाते हुये पढ़ें:-

**लिंगेऽद्य भक्त-दयया क्षणमात्रम्-एकं स्थानं निधाय भव-मत्-विहितांपुरारे । सर्वेश विश्वमय ! हृत्कमलादि-रूढ पूजां गृहाण भगवन् भव मेद्य तुष्टः! भूमेर्-जलात्-च, पवनात्-अनलात्-हिमांशोर्-उष्णार्चिषो हृदयतो गगनात-समेत्य, लिंगद्य सन्मणिमये मत्-अनुग्रहार्थ भक्त्यैक-लभ्य ! भगवन् कुरु सन्निधानम् भगवन् पार्वतीनाथ भक्तानुग्रह-कारक अस्मत्-दयानुरोधेन सन्निधानं कुरु प्रभो।।**

दोनों हाथों में मुट्ठीभर फूल उठाकर तीन बार गायत्री मन्त्र पढ़कर भगवान् शंकर पर चढ़ाते हुये पढ़ें:-

**इत्या-हूय तु गायत्रीं त्रिसम्-उच्चार्य तत्त्व-वित्, मनसा चिन्तितैर्-द्रव्यै-र्देवम्-आत्मनि पूजयेत्, तेजोरूपं ततः क्षिप्त्वा प्रतिमायां पुनर्यजेत्।**

दोनों कन्धों से जव फेंक कर प्राणयाम करें और खोसू में जल डालते हुये पढ़ें:-

**पाद्यार्थम्-उदकं नमः, शन्नो देवीर्-अभिष्टये आपो भवन्तु पीतये, शंयोर-अभि-स्रवन्तु नः।** अब यही खोसू हाथ में लेकर पढ़ें:-**भगवन्तः पाद्यं पाद्यम्।**

खोसू का जल भगवान् शंकर पर डालते हुये पढ़ें :-

**महादेव महेशान महानन्द परात्-पर, गृहाण पाद्यं मत्-दत्तं पार्वती परमेश्वर।। भगवते भवाय देवाय पार्वती-सहिताय परमेश्वराय देवीपुत्र-बटुक-नाथाय, कालरात्र्यै शिवरात्र्यै समस्त-शिवरात्रि-देवताभ्यः पाद्यं नमः।**

इस पाद्य से बचा हुआ जल निर्माल्य पात्र में डालकर खोसू में जल डालते हुये पढ़ें:-

**शन्नो देवीर्-अभीष्टय आपो भवन्तु पीतये। शंयोर्-अभि-स्रवन्तुनः।**

दर्भ, जल, दूध, घी, दही, चावल, यह आठ वस्तु इकट्ठे अर्ध्य कहलाते हैं-यही जल की धारा शंकर भगवान् अथवा सञ्पुलू पर डालते हुये पढ़ें:-

**भगवन्तो-अर्घ्यम्-अर्घ्यम्। त्र्यम्बकेश सदाचार विपदां प्रतिघातक अर्घ्यं गृहाण देवेश सम्पत्-सर्वार्थ-साधक। भगवन् भवदेव पार्वती-सहित-परमेश्वर देवीपुत्र-वटुकनाथ, कालरात्रि तालरात्रि राज्ञिरात्रि शिवरात्रि समस्त-शिवरात्रि-देवताः इदं वो-ऽर्घ्यं नमः।**

अब भगवान् शंकर को पञ्चदशस्नान कीजिये:- जल, दूध, दही, शहद , घी, गन्ना, सर्वोषधि, धान्य की फुल्लियाँ, फूल, फल, सोना, रत्न, सर्षप, धान्य, इत्र, इन सबको मिलाकर शिवलिंग पर जल की धारा डालते हुये पढ़ें:-

**(1) असंख्याता सहस्राणि ये रुद्रा अधिभूम्यां, तेषां सहस्र-योजनेव धन्वानि तन्मसि (2) योस्मिन्-मह-त्यर्णवे-अन्तरिक्षे भवा-अधि।**

**तेषां-सहस्र योजनेव धन्वानि तन्मसि (3) ये नीलग्रीवाः शतिकण्ठा दिवं रुद्रा उपाश्रिता, तेषां सह. (4) ये नीलग्रीवा शिति-कण्ठा शर्वा-अधः क्षमा-चराः तेषां स. (5) ये वनेषु शिषिपिंजरा नीलग्रीवा विलोहिताः तेषा ं(10) ये एतावन्तो वा-भूयांसों वा दिशो रुद्रा वितिष्ठिरे तेषां सहस्र योजनेव धन्वानि तन्मसि।**

**ॐ यो रुद्रो-अग्नौ यो-अप्सु य-औषधीषु यो वनस्पतिशु ! यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो-अस्तु-देवाः। भगवते भवाय देवाय उमा-सहिताय शिवाय पार्वती-सहिताय-पर-मेश्वराय पंचदश-स्नानं परिकल्पयामि नमः।**

देवता तथा पितरों के लिये चावल, दही, तिल, शहद और घी सहित जल से तर्पण करते हुये पढ़ें :-

**ब्रह्मादयः-देवा : तृप्यन्ताम् 1 कण्ठो पवीती** (गले में यज्ञोपवीत रखकर पढ़े - **सनकादयः ऋषय : तृप्यन्ताम्।**

यज्ञोपवीत बायें तरफ रख कर पढ़ें:-

**अग्नि-ष्वाता दयः पितरः तृप्यन्ताम् तृप्यन्ताम् तृप्यन्ताम्।**

यज्ञोपवीत दायाँ रख कर पढ़ें -

**ॐ नमो देवेम्यः।**

यज्ञोपवीत गले में रख कर पढ़ें :-

**स्वाहा ऋषिभ्यः-**

बायाँ यज्ञोपवीत रख कर पढ़ें :-

**स्वधापितृम्यः,** दायाँ यज्ञोपवीत रख कर पढ़ें :-

**आब्रह्मस्-तम्ब-पर्यन्तं ब्रह्माण्डं सचराचरं जगत्-तृप्यतु तृप्यतु तृप्यतु।**

शंकर भगवान् अथवा सुञपुतलू पर फिर से स्नान के निमित्त जलधारा डालते हुये पढ़ें :-

**त्रयम्बंकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकम्-इव बन्धनात्-मृत्योर्-मुखीय मामृतात्। शिवरात्रि-देवताम्यः मन्त्रगुडकं नमः।।**

बायें हथेली के मध्य में थोड़ा सा चावलों सहित जल लेकर और उसी हाथ की तर्जनी और अँगूठे में थोड़ा सा चावलों सहित जल लेकर उसी हाथ को देवताओं यानि बटुकराज के चारों ओर घुमाकर उस जल और चावलों को अपने बायें कन्धे पर से फेंकते हुये पढ़ें :-

**रक्षोहणं वाजिनम्-आजिघर्मि मित्रं पृथिष्टम्-उपयामि शर्म। शिशनो अग्निः कतुभिः समिद्धः सनो देवः सरिषः पातु नक्तम्। शिवरात्रि देवताभ्यः आरात्रिकां परिकल्पयामि नमः।**

दायें अंगूठे तथा तर्जनी यानी अंगूठे की साथ वाली अंगुली से शिवमूर्ति का स्पर्श करके अपने नेत्रों से लगाते हुये पढ़ें :-

**भवाय देवाय उमासहिताय शिवाय पार्वती सहिताय परमेश्वराय नेत्र स्पर्शनं नमः।**

अब जहाँ शंकर की मूर्ति को बिठाना हो वहां फूलों से आसन सजाते हुये पढ़ें :-

**आसनाय नमः वृषभासनाय नमः शतदल-पद्मासनाय नमः सहस्रदल पद्मासनाय नमः।**

अब सोने के वर्कों और फूलों की मालाओं से शंकर भगवान् तथा वटुकनाथ को सजाकर **महिम्नापार** तथा देवी के श्लोकी पचंस्तवी आदि के श्लोक पढ़ते हुये फूल चढ़ाते जायें।

भगवान् शंकर पर वस्त्र के रूप में फूल चढ़ाते हुये यह श्लोक पढ़ें :-

**कालाग्निरुद्र सर्वज्ञ वरदा-ऽभयदायक वस्त्रं गृहाण देवेश दिव्य-वस्त्रोप-शोभितम्। समस्त शिरात्रि-देवताभ्यः वस्त्रं परिकल्पयामि नमः**

यज्ञोपवीत के रूप में पुष्प चढ़ाते हुये पढ़ें :-

**यज्ञोपवीतं परमं पवित्रं प्रजापतेर्-यत् सहजं पुरस्तात्, आयुष्यम्-अग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलम्-अस्तु तेजः। समस्त शिवरात्रि-देवताभ्यः यज्ञोपवीतं परिकल्पयामि नमः।।**

शंकर की मूर्ति वटुकनाथ और बाकी पात्रों को सिंदूर का तिलक तथा शंकर को चन्दन लगाते हुये पढ़ें -

**त्रिपुरान्तक देवेश पार्वती-प्राण-वल्लभ ! गृहाण गन्धं काश्मीर-चन्द्रचन्दन कल्पितम्। भगवते भवाय देवाय, महादेवाय,**

ईशानाय देवाय, उमासहिताय शिवाय, पार्वती सहिताय परमेश्वराय देवीपुत्र-वटुकनाथाय कालारात्र्यै तालरात्र्यै शिवरात्र्यै समस्त-शिवरात्रि देवताभ्यः अर्घोनमः पुष्पं नमः।

महादेव - मृढानीश जगृत-ईश निरंजन धूपं गृहाण देवेश साज्यं गुग्गुल-कल्पितम्। ॐ तत्-सत्-ब्रह्म-अद्यतावत्-तिथौ अद्य फाल्गुणमासस्य कृष्णपक्षस्य तिथौ .......... समस्त शिवरात्रि-देवताम्यः रत्नदीपं कर्पूरं परिकल्पयामि नमः चामरम्-रजनीनाथ मरीचिप्रभम्-उत्तमम्। हेमदण्डयुतं देव गृहाण गिरिजापते, ॐ तत्-सत्-ब्रह्म अद्य-तावत् तिथौ अद्य-कृष्णपक्षस्य तिथौ........समस्तशिवरात्रि देवताभ्यः चामरं परिकल्पयामि नमः

फूलों का छत्र चढ़ाते हुये पढ़ें :-

नवरत्नमयं दिव्यं मुक्ता-जाल-विभूषितम् गृहाण छत्रं भगवन्-शिव-भद्रासन-प्रद। समस्त शिरात्रि देवताभ्यः छत्रं परिकल्पयामि नमः।

आईना दिखाते हुये पढ़ें :-

एताभ्यः समस्त शिवरात्रि देवताभ्यः आदंर्श परिकल्पयामि नमः।

फिर से सभी वटुकनाथादि को फूल चढ़ाते हुये पढ़ें :-

एताभ्यः समस्त शिवरात्रि-देवताम्यः वासो नमः।

नमस्कार करते हुये पढ़ें :-

एतासां देवतानाम्-अर्ध्यदानादि-अर्चन-विधिः सर्वः परिपूर्णः अस्तु।

दूध, कन्द या नाभद आदि वटुक में डालते हुये पढ़ें :-

क्षीराज्य-मधुसंमिश्रं शुभ्र दध्ना समन्वितम्। षड्-रसैश्च समायुक्तं गृहाण-अन्नं निवेदये। समस्तशिवरात्रि-देवताभ्यः मात्रा-मधुपंर्क चरुं ॐ नमो नैवेद्यं निवेदयामि नमः।

फूलों की अंजलि चढ़ाते हुये पढ़ें :-

हर विश्वा-खिलाधार निराधार निराश्रय पुष्पाँजलिम्-इमं शम्भो गृहाण वरदो भव। समस्त शिवरात्रि-देवताभ्यः पुष्पाँजलिम् समर्पयामि नमः।

मन से अर्ध परिक्रमा करते हुये पढ़ें :-

यानि कानि च पापानि ब्रह्म-हत्यादिकानि च। तानि तानि प्रणश्यन्ति शिवस्यार्ध-प्रदक्षिणात्।

भगवान् शंकर पर फूल चढ़ाते हुये पढ़ें :-

नाग्रेन्द्र-हाराय त्रिलोचनाय भस्माङ्ग-रागाय महेश्वराय, देवाधिदेवाय दिगम्बराय तस्मै नकाराय नमः शिवाय। मातंग-चरमा-म्बर-भूषणाय समस्त-गीर्वाण गणार्चिताय त्रैलोक्यनाथाय पुरान्तकाय तस्मै मकाराय नमः शिवाय। वशिष्ठ-कुम्भोत्-भव-गौतमादि-मुनीन्द्र-वंद्याय गिरीश्वराय, श्री नीलकण्ठाय वृष-ध्वजाय तस्मै वकारायनमः शिवाय। यज्ञ-स्वरुपाय जटाधराय पिनाक-हस्ताय सनातनाय नित्याय शुद्धाय निरंजनाय तस्मै यकाराय नमः शिवाय। आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं, पूजा-ते विषयोप-भोग रचना, निद्रा समाधिस्थितिः। संचारः पदयोः प्रदक्षिण विधिः स्त्रोत्राणि सर्वा गिरः। यत्यत् कर्म करोमि तत् तत्-अखिलं शम्भो-स्तवाराधनम्।।

उभाभ्यां जानुभ्यां शिरसा-उरसा वचसा नमस्कारं करोमि नमः।

चावल आदि को संकल्प करते हुये पढ़ें :-

अन्नं नमः अन्नं नमः आज्यं आज्यं अद्य दिने-अद्य यथा संकल्पात्-सिद्धिर्-अस्तु। अन्न-हीनं विधि-हीनं द्रव्य-हीनं मन्त्र हीनं यत्-गतं तत्सर्वम्-अछिद्रं सम्पूर्णम्-अस्तु, एवम्-अस्तु

खोसू में दायें हाथ की अंगुलियों के ऊपर से जल डाल कर उसी जल से शंकर भगवान् तथा वटुकनाथ आदि को वही जल आचमन के रूप में देते हुये पढ़ें :-

शं नो देवीर्-अभिष्टये आपो भवन्तु पीतये शंयोर्-अभि स्रवन्तु नः,

**समस्त शिवरात्रि-देवताभ्यः अपोशानं नमः आचमनीयं नमः।**

फिर से दायें हाथ की अँगुलियों के ऊपर से खोसू में जल डालकर उस में सिक्के के रूप में कुछ दक्षिणा भी डालें, वह दक्षिणा सभी वटुकनाथ आदि को अर्पण करते हुये पढ़ें :-

**शंनो देवीर्-अभीष्टये आपो भवन्तु पीतये शंयोर्-अभिस्रवन्तु नः समस्त-शिवरात्रि-देवताभ्यः दक्षिणायै तिल हिरण्य-रजत निष्कर्णं ददानि।**

फिर से कुछ सिक्के आदि अर्पण करते हुये पढ़ें :-

**ऐता देवताः सदक्षिणा-न्नेन प्रीयन्तां प्रीताः सन्तु।**

वटुकनाथ को फूल चढ़ाते हुये पढ़ें :-

**नाथं नाथं त्रिभुवन-नाथं भूति-सितं त्रिशूल-धरं। उपवीती-कृतं भोगिनम्-इन्दु-कलाशेखरं वन्दे।**

108 भार सभी घर के सदस्य एकत्रित होकर सामूहिक रूप में पढ़ें, आप को इस मन्त्र के उच्चारण करने से अवश्य शान्ति मिलेगी और आप की मनोकामना पूरी होगी (मन्त्र)

**ॐ नमः शम्भवाय च, मयोभवाय च, नमः शंकराय च, मयस्कारय च नमः शिवाय, च शिवतराय च।।**

## वैश्वदेव विधि :-

वटुकनाथ के सामने ही अग्नि जलाकर, उस अग्नि के दक्षिण पश्चिम-कोण पर विष्टर (दर्भ) तिल और चावल पानी सहित एक कटोरी रखें इस पात्र को प्रणीतपात्र कहते हैं, उस प्रणीत पात्र में तीन बार फूल डालते हुये पढ़ें :-

**सवंः सृजामि हृदयं संसृष्टं मनो अस्तु वः (1) संसृटाः तन्वः सन्तु वः, संसृष्टः प्राणो-अस्तु वः (2) संय्यावः प्रिया-स्तन्वः संप्रिया हृदयानि वः, आत्मा वो-अस्तु संप्रियः संप्रिया-स्तन्वो मम (3)**

दर्भ के दो तिनके अग्नि में जलाकर दायें ओर फेंकते हुये पढ़ें :-

**निर्दग्धं रक्षो निर्दग्धा-रातिर्-अपाग्ने, अग्नि-मामादं जहि निष्क्रव्या-दं सीधा देवयजनं वह।**

प्रणायाम करके अग्नि के दायें ओर रखते हुये प्रणीतपात्र में से नौ बार छिड़कते हुये पढ़ें:-

**ऋतंत्वा सत्येन परिसमू-ह्यामि (1) सत्यं त्वर्तेनं परिसमूह्या-मि (2) ऋत्त-सत्याभ्यां-त्वा परिसमूह्यामि (3) ऋतं त्वा सत्येन पर्युक्षामि**

**(4) सत्यं त्वर्तेन पर्युक्षामि (5) ऋत-सत्याभ्यां त्वा पर्युक्षामि (6) ऋतं त्वा सत्येन परि-षिंचामि (7) सत्यं त्वेंन परिषिञ्चामि (8) ऋतसत्याभ्यांत्वा परिषिञ्चामि (9)** अग्नि के चारों ओर दर्भ के चार काण्ड पूर्व दक्षिण उत्तर पश्चिम से छोड़ते हुये पढ़ें :-

**यज्ञस्य सन्ततिर्-असि यज्ञस्य त्वा सन्तत्यै स्तृणामि।**

अग्नि को तिलक फूल चढ़ाते हुये पढ़ें :-

**अग्नये शुकारूढाय स्वाहासहिताय पावकाय त्रिनेत्राय तेजोरूपाय शक्ति-सहिताय सभालभं गन्धो नमः अर्घो नमः पुष्पं नमः।**

घी सहित पकाये हुये अन्न या रोटी पर दर्भ के दो तिनके लगाते हुये पढ़ें :-

**वैश्वदेवस्य सिद्धस्य सर्वतोग्र्यस्य अन्नस्य जुहोति-पाकस्य घृतेन संलिप्य स्वस्ति-अस्तु घृतम्-अभिधार्य।**

इसी अन्न रोटी चुचवुर से अग्नि में आहुतियाँ डालते हुये पढ़ें :-

**मित्राय स्वाहा, वरुणाय स्वाहा, इन्द्राय स्वाहा, इन्द्राग्निभ्यां स्वाहा, विश्वेभ्यो-देवेभ्यः स्वाहा, प्रजापतये स्वाहा, अनुमत्यै स्वाहा, ध्वान्वन्तरये स्वाहा, वास्तोष्पतये स्वाहा, वासुदेवाय स्वाहा, लक्ष्मी सहिताय नारायणाय स्वाहा।**

किसी थाली आदि में सिलोना सहित चावल आदि रख कर सभी परिवार वाले उस थाली को हाथों से स्पर्श करते हुये प्रेप्युन पढ़ें :-

## प्रेप्युन (नैवेद्यमन्त्र)

**अमृतेश-मुद्रया-अमृती-कृत्य अमृतम्-अस्तु-अमृतायतां नैवेद्यं, सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनो-बाहुभ्यां-पूष्णो हस्ताभ्याम्-आददे, महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार-देवताभ्यः प्रजापतये ब्रह्मणे कलश-देवताभ्यः ब्रह्म-विष्णु-महेश्वर-देवताभ्यः चातु-र्वेदेश्वराय ऋतुपतये नारायणाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्नि-ष्वात्ता-दिभ्यः पितृ-गण-देवताभ्य ॐ भगवते वासुदेवाय लक्ष्मी स्वहिताय नारायणाय भवाय देवाय पार्वती-सहिताय-परमेश्वराय विनाकयाय**

वल्लभासहिताय श्री गणेशाय क्लीं कां कुमाराय भगवते ह्राँ ह्रीँसः सूर्याय प्रभासहिताय-आदित्याय भगवत्यै अमायै कामायै चार्वंग्यै टंकधारिण्यै तारायै पार्वत्यै यक्षिण्यै श्रीशारिका भगवत्यै श्रीशारदा भगवत्यै श्री-महाराज्ञी भगवत्यै श्रीज्वाला भगवत्यै व्रीडाभगवत्यै वैखरी भगवत्यै वितस्ता भगवत्यै गंगा भगवत्यै यमुनाभगवत्यै कालिका भगवत्यै सिद्ध-लक्ष्म्यै महालक्ष्म्यै महात्रिपुर-सुन्दर्यै सहस्तनाम्न्यै देव्यै भवान्यै अभयंकरी देव्यै क्षमंकरी-भगवत्यै-सर्व-शत्रु-घातिन्यै इह-राष्ट्रा-धिपतये अमुक-भैरवाय इन्द्रा-दिभ्यो दशलोक-पालेभ्यः आदित्या-दिभ्यो नवग्रह-देवताभ्यः ब्राह्मादिभ्यः मातृभ्यः गौर्यादिभ्यः मातृभ्यः ललितादिभ्यः मातृभ्यः बार्हस्पत्य-देवताभ्यः ॐ भूर्-देवताभ्यः ॐ भुवो देवताभ्यः ॐ भूर्- भुवः- स्वर्- देवताभ्यः अखण्ड ब्रह्माण्ड-याग-देवताभ्यः महागायत्र्यै सावित्र्यै सरस्वत्यै हेरकादिभ्यः वटुकादिभ्यः-उत्पन्नम्-अमृतं दिव्यं प्राक्क्षीरो-दधि-मन्थनात् अन्नम्-अमृत-रूपेण नैवेद्यं प्रति-गृह्यताताम्

इष्ट देवता का ध्यान करते हुये पढ़ें :-

ॐ तत्-सत्-ब्रह्म-अद्य्-तावत् तिथौ-अद्य-अमुक-मासस्य अमुक-पक्षस्य तिथौ अमुकायां आत्मनो-वाङ्मनः कायो-पार्जित-पाप-निवार-णार्थ ॐ नमो नैवेद्यं निवेदयामि नमः।

प्रेप्युन करके अग्नि के दायें ओर पूर्व की ओर सिरे वाले दर्भ बिछाकर पढ़ें :-

पूर्वाग्रान्-दर्भान्-आस्तीर्य

उसी बिछाई हुई दर्भ पर दक्षिण पश्चिम कोण से पंक्ति में (लाईन) साँप आकार में रोटी के तीन-तीन टुकड़े देवताओं को बलि देवें आगे लिखे छतीस नामों से रोटी के टुकड़े या अन्न डालते हुये पढ़ें :-

तक्षाय नमः, उपतक्षाय नमः, अम्बा-नामासि-नमस्ते, दुला-नामासि नमस्ते, नितंत्री-नामासि नमस्ते, चुपनीका-नामासि नमस्ते, अभ्रयन्ती-नामासि नमस्ते, मेघयन्ती नामासि नमस्ते,

**वर्षयन्ती-नामासि-नमस्ते, नन्दिन्यै नमस्ते, सुभगे नमस्ते, सुमङ्लि-नमस्ते, भद्रं-करि नमस्ते, श्रियै हिरण्य-केश्यै नमः, वनस्पतिभ्यो नमः, धर्माय नमः, अधर्माय नमः वैश्रवणाय-राज्ञे नमः, भूतोभ्यो-नमः, इन्द्राय नमः, इन्द्र-पुरुषेभ्यो नमः, ब्रह्मणे नमः, ब्रह्म-पुरुषेभ्यो नमः ऊर्ध्वं आकाशाय नमः, स्थण्डिले दिंवचरेभ्यो-भूतेभ्यो नमः, नक्तं चरेभ्यो नमः (36) षट् त्रिंशत् तक्षादिभ्यो-अन्नं नमः, आचमनीयं नमः।**

बायाँ यज्ञोपवीत रखकर दर्भ बिछाते हुये पढ़ें :-

**अपसव्येन, दक्षिणा-ग्रान्-दर्भान्-आस्तीर्य !**

दर्भ पर तिल और जल से छींटे देते हुये पढ़ें :-

**समस्त-माता-पितृभ्यो-द्वादश-दैतेभ्यः पितृभ्यो भूपृष्ठे दर्भास्तरणे तिलोदकेन अवने-जनं स्वधा।**

इसी बिछाई हुई दर्भ को अंगूठे से स्पर्श करते हुये पढ़ें :-

**उशन्तस्त्वा-हवामह उशन्तः समिधीमहि, उशन् आवह पितॄन्-हविषे अत्तवे।**

तिल, पानी, दूध, दीप, धूप, अन्न, घी और शहद यह आठ द्रव्य पितरों का अन्न होता है यह एक पात्र में रखें और पढ़ें :-

**तिलास्तोयं तथा क्षीरं दीपधूपौ बलिस्तथा, मधु-सर्पिः समायुक्तम्-अष्टांगम्-अन्न-सम्भवम्।**

बायाँ घुटना पृथिवी पर रखकर पितरों का नाम उच्चारण करते हुये पात्र में रखा हुआ यह अन्न दर्भ पर रखते हुये यह मंत्र पढ़ें :-

**देवताभ्यः पितृभ्यश्च महा-योगिभ्य एवच। नमः स्वधाच स्वाहाच नित्यम्-एव-भवतु-इह**

**ॐ तत्-सत्-ब्रह्म-अद्य तावत्-तिथौ अद्य फाल्गुणमास्य कृष्णपक्षस्य तिथौ द्वादयशं.......वारान्वितायां**

पितरों का नाम लेते हुये अन्न दर्भ पर डालते जाये,

**पितामह-एतत्-ते अन्नं ये च त्वानु, प्रपितामह एतत्-ते अन्नं ये च त्वानु, मात एतत्-ते अन्नं याश्च-त्वानु।**

इसी भांति मृत स्त्रियों के नाम लेते हुये अन्न रखते जायें और सभी मृत-पितरों को अन्न डालकर जिन के नाम याद न हों रोटी के टुकड़े अन्नादि हाथ में लेकर यह मन्त्र पढ़ें :-

**मातृपक्ष्यास्तु ये के चित्-ये चान्ये पितृपक्षजाः गुरु-श्वशुर-बन्धूनां ये कुलेषु समुद्भवाः, ये प्रेतभावम्-आपन्ना ये चान्ये श्राद्ध-वर्जिता-अन्न-दानेन ते सर्वे लभन्ताम् तृप्तिम्-उत्तमाम्। समस्त-मातापितृभ्यो द्वादश-दैवतेभ्य पितृभ्योऽन्नं स्वधा।**

अन्न का लेप साफ करते हुये पढ़ें :-

**अन्न लेपं निवारदेत्**

तिलक फूल चढ़ाते हुये पढ़ें :-

**समस्त-माता-पितृभ्यः समालभनं गन्धः स्वधा, समस्तमाता पितृभ्यः अर्घ्य : स्वधा, धूपः स्वधा।**

तर्पण करते हुये पढ़ें :-

**समस्तमाता-पितृभ्यः भक्ष्य-भोज्य-फल-मूल-बलि-नैवेद्यम-आहरादि-अन्नं स्वधा।**

तिल, पानी, शहद डालते हुये पढ़ें :-

**समस्तमाता-पितृभ्यः तिल-मधु-मिश्रमुदक-पात्रम्-आचमनीयं जलं स्वधा**

तर्पण करते हुये पढ़ें :-

**समस्तमाता-पितृभ्यः हिमपानं स्वधा क्षीरपानं स्वधा मधुपानं स्वधा तिलोदकं स्वधा उदक-तर्पणं हिमं हिमं रजतं रजतम्।।**

दायाँ यज्ञोपवीत रखते हुय पढ़ें :-

**सव्येन-वसन्ताय नमः, ग्रीष्माय नमः, वर्षाभ्यो नमः, शरदेनमः हेमन्ताय नमः शिशराय नमः षड्-ऋतुभ्यो नमः।**

अग्नि में अन्न की आहुति डालते हुये पढ़ें :-

**अग्नये स्विष्टकृते स्वाहा।**

हाथ धोकर प्राणायाम करके अग्नि को तीन बार छिड़कते हुय पढ़ें :-

**ऋतुंत्वा सत्येन विमुंचामि (1) सत्यं त्वर्तेन विमुंचामि (2) ऋत सत्याभ्यां त्वा विमुंचामि (3)**

अग्नि के चारों तरफ छोड़ी हुई दर्भ उत्तर दिशा से उठाते हुय पढ़ें :-

**यज्ञस्य सन्ततिर-असि यज्ञस्य त्वा सन्तत्यै नयामि।**

फूल हाथ में लेते हुये अग्नि देवता से आर्शीवाद माँगते हुय पढ़ें :-

**धर्मं देहि, धनं देहि, पुत्रपौत्रान्-च देहि मे, आयुर्-आरोग्यम्-ऐश्वर्यम् देहि मे हव्य-वाहन, तेजोसि तेजे मयि देहि।**

अग्नि की ज्योति हाथ से अपनी ओर लेते हुय पढ़ें :-

**इत्यात्मानं देहि भगवन् सन्निधत्स्व।**

पृथ्वी पर थोड़ा सा अन्न फिर से डालते हुय पढ़ें :-

**भगवन्-यक्ष्म एतत्-तेऽन्नं नमः, एतत्-ते-आचमनीयं नमः** यज्ञोपवीत गले में रखते हुये पढें :- **कण्ठोपवीती-हन्त-मनुष्यभ्यः सनकादिभ्य-ऋषिभ्यः अन्नं नमः आचमनीयं नमः**

दायाँ यज्ञोपवीत रख कर "चटू" को हाथों से पकड़ कर तिलक पुष्प लगाते हुय पढ़ें :-

**या काचित्-योगिनी रौद्रा सौभ्या घोरतरा परा, खेचरी भूचरी रामा तुष्टा भवतु मे सदा, आकाश-मातृभ्यो-अन्नंनमः, समाल-भनं गन्धोनमः अर्घो नमः पुष्पं नमः।**

भगवान् शंकर का ध्यान मन में रख कर किसी पात्र में थोड़ा सा अन्न रखते हुये पढ़ें :-

**शिवरात्रि-देवता-भ्यः बलिं समर्पयामि नमः।**

अब जो दर्भ पर आपने अन्न कण रखे है उनके पास ही पृथ्वी पर और प्राणियों को अन्न डालते हुये पढ़ें :-

**(गोग्रास) सौर-भेय्याः स्वर्ग-हिताः पवित्रा पुण्यराशयः, प्रति-गृह्णन्तु मे ग्रासं गावः त्रैलोक्य-मातरः। गोभ्योऽन्नं नमः, ऐन्द्र-वारुण-वाय-व्या-याम्या-नैऋति-काश्च-ये, वायसाः- प्रति-गृह्णन्तु इमं पिण्डं मयोद्-धृतम्, काकेभ्यः अन्नं नमः, श्वानौ द्वौ शाव-शवलौ वैवस्वत-कुलोद्-भवौ, ताभ्यां पिण्डं प्रदास्यामि स्याताम्-एतौ-अहिंसकौ श्वभ्यः श्वानकेभ्यः अन्नं नमः।**

बायाँ यज्ञोपवीत रख कर पढ़ें :-

**असव्येन-रौरवाधीन-सत्वानां-प्रेत-द्वार-निवासिनाम्-अर्थिनां याचमानानाम्-अक्षय्यम्-उपतिष्ठतु।**

दायाँ यज्ञोपवीत रख कर पढ़ें :-

सव्येन, शुनां च पतितानां च श्वपचां पाप-रोगिणाम्। वायसानां क्रिमीणां च शनकैर्-निक्षिपेत्-भुवि, देवा मनुष्याः पशवो वयांसि-सिद्धाः सयक्षोरग-दैत्यसंघाः, प्रेता पिशाचाः तरवः समस्ता ये चान्नम्-इच्छान्ति मया प्रदत्तम्। पिपीलिकाः कीट-पतंग-काद्या बुभुक्षिताःकर्मणि बद्ध-बद्धाः, प्रयान्तु ते तृप्तिम्-इदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु। येषां न माता पिता न बन्धुर् नैवान्न-सिद्धिर्-न तथान्नम्-अस्ति तत्-तृप्तयेऽन्नं भुवि दत्तम्-एतत्-ते यान्तु तृप्तिं मुदिता भवन्तु, भूतानि सर्वाणि तथान्नम्-एतत्-अयं चरिष्णुर्-न ततो-न्यत्-अस्ति तस्मात्-अहं भूत-निकाय-भूतम्-अन्नं प्रयच्छामि भवाय तेषाम्। चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिल-भूत-संघाः, तृप्त्यर्थम्-अन्नं हि मया विसृष्टं, तेषाम्-इदं ते मुदिता भवन्तु, इत्युच्चार्य नरो दद्यात्-अन्नं श्रद्धा समन्वितः, भुवि भूतोप-काराय गृही सर्वाश्रयो यतः।

बायां यज्ञोपवीत रख कर अंगूठे के तरफ से अन्न सलोना सहित डालते हुय पढ़ें :-

यमाय धर्मराजाय मृत्यवे चान्तकाय च, वैवस्वताय कालाय सर्वप्राणहराय च, औदुम्बराय नीलाय, ब्रध्नाय परमेष्ठिने, वृकोदराय भीमाय चित्रगुप्ताय वै नमः, पाशहस्त कृतान्ताय प्रेताधिपतये नमः श्रीयमराज-धर्मराज-चित्रगुप्त-तृप्तयेऽस्तु !

दायां यज्ञोपवीत रखकर "पवित्र" निकाल कर सभी डुलिजियों और सज्वारियों में ऋषिडुलिजियों में सतसोस दूध, अन्न सलोना डालते हुये पढ़ें :-

नोट :- वैश्वदेव प्रायः हर एक पूजा में करना होता है, परन्तु यह अन्न आदि डालना केवल शिवरात्रि में ही होता है :

ये विश्व-भाविन भूता ये च तेषु-अनुयायिनः, आहरन्तु बलिं तुष्टाः प्रयच्छन्तु शिवं मम।

योऽस्मिन्-निवसति क्षेत्रे क्षेत्रपालः सकिंकरः, तस्मै निवेदया-म्यद्य

बलिं पानीय-संयुतम्। क्षां-क्षेत्राधिपतये-बलिं नमः, रां राष्ट्राधिपतये बलिं नमः, सर्वे-अभय-वरप्रदा मह्यं पुष्टिं पुष्टिपतयो ददातु

बायाँ यज्ञोपवीत रखकर अन्नकणों पर फूल चढ़ाते हुये पढ़ें :-

आयुः प्रजां धनं विद्यां स्वर्गमोक्षौ सुखानि च, प्रयन्छन्तु तथा राज्यं नृणां प्रीताः पितामहाः (1) एष पिण्डो मया दत्तः तव हस्ते जनार्दन, गयायां पितृरूपेण स्वयम्-एवोप-गृह्यताम् (2) आत्मनश्चार्थ-लाभाय क्षेमाय विजयाय च, शत्रूणां, बृद्धि-नाशाय पितृन्-उद्धरणाय च (3) पंचक्रोशं गयाक्षेत्रं क्रोशम्-एकं गयाशिला, यत्र तत्र स्मरेत्-नित्यं पितृणां दत्तम्-अक्षयम्।

## इति वैश्वदेव-विधि

दायाँ यज्ञोपवीत रख कर देवताओं का विसर्जन (शिवरात्रि विषयक)- दर्भ के दो तिनके चावल सहित हाथ में रखकर तीन बार पढ़ें :-

ॐ भूः पुरुषं विसर्जयामि नमः, ॐ भुवः पुरुषं विसर्जयामि नमः, ॐ स्वः पुरुषं विसर्जयामि नमः (3)

ॐ तत्-पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् (3) ॐ तत्-सत्-ब्रह्म अद्य-तावत् तिथौ अद्य फाल्गुणमासस्य कृष्णपक्षस्य द्वादश्यां वारान्वितायां भवस्य देवस्य उग्रस्य देवस्य भीमस्य देवस्य कालरात्र्याः तालरात्र्याः शिवरात्र्याः समस्त शिवरात्रि-देवतानाम्-पूजनमऽच्छिद्रं सम्पूर्णम्-अस्तु एवम्-अस्तु।

चावल सहित जल से तर्पण करते हुये पढ़ें :-

एताभ्यो देवताभ्यो यवोदकं नमः उदक-तर्पणं नमः आज्ञा मे दीयतां नाथ नैवेद्य-स्यास्य भक्षणे, शरीर-यत्रा सिद्ध्यर्थं भगवन् क्षन्तुम्-अर्हसि।

प्रार्थना के रूप में पढ़ें :-

आपन्नोस्मि शरण्योसि सर्वावस्थासु सर्वदा, भगवन्-त्वां प्रपन्नोस्मि रक्ष-मां शरणा-गतम्। हर-शम्भो महादेव शरणागत-वत्सल नान्यः त्रातासि मे कश्चित् ऋते त्वत्-परमेश्वर, आशिरा-वन्तं

निमग्नो-स्मि दुस्तरे भव कर्दमे प्रसीद कृपया शम्भो पादाग्रेण-उद्धरस्व माम्। यत्-कृतं यत् करिष्यामि तत् सर्वं न मया कृतम्, त्वया कृतं तु फलभुक्-त्वम्-एव परमेश्वर। शब्द ब्रह्ममये स्वच्छे देवि त्रिपुर-सुन्दरि, यथा शक्तिं जपं पूजां गृहाण परमेश्वरि। दर्शनात्-पाप-शमनी, जपात्-मृत्यु-विनाशिनी, पूजिता दुःख-दौर्भाग्य-हरा त्रिपुर-सुन्दरी। आह्वानं नैव जानामि नैवजानामि पूजनम्-पूजा-भागं न जानामि क्षम्यतां परमेश्वर।

प्रणाम करते हुये पढ़ें :-

उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा उरसा वचसा नमस्कारं करोमि नमः।

तर्पण करते हुये पढ़ें :-

नमो ब्राह्मणे, नमो अस्त्वग्नये, नमः पृथिव्यै, नमः औषधीभ्यः, नमो वाचे, नमो वाचस्पतये, नमो विष्णवे, बृहते कृणोमि इति एतासाम्-एव देवतानां सामीप्यं सारिष्टतां सायुज्यं सलोकतां-आप्नोति य एवम्-एव-विद्वान् स्वाध्यायम्-अधीते।

ॐ नमः शम्भवाय च, मयोभवाय च, नमः शंकराय च, मयस्कारय च नमः शिवाय च, शिवतराय च।।

ॐ शान्तिः शान्तिः शान्तिः

## शिवचामर स्तुतिः

व्याप्त-चराचर-भाव-विशेषं, चिन्मयम्-एकम्-अनन्तम्-अनादिम्।
भैरवनाथम्-अनाथ-शरण्यं, तन्मय-चित्ततया हृदि वन्दे (1)
त्वत्-मयम्-एतत्-अशेषम्-इदानीं, भाति मम त्वत्-अनुग्रह-शक्त्या।
त्वंच महेश सदैव ममात्मा स्वात्म-मयं मम तेन समस्तम् (2)
स्वात्मनि विश्वगते त्वयि नाथे, तेन न संसृति-भीतेः कथास्ति।
सत्-स्वपि दुर्-धर-दुःख-विमोह-त्रास-विधायिषु कर्म-गणेषु (3)
अन्तक मां प्रति मा दृशम्-एनां, क्रोध-कराल-तमां विदधीहि।
शंकर-सेवन-चिन्तन-धीरो, भीषण-भैरव-शक्ति-मयोस्मि (4)

इत्थम्-उपोद-भवन्-मय-संवित् दीधिति-दारित-भूरि-तमिस्त्रः।
मृत्यु-यमान्तक-कर्म-पिशाचैर्, नाथ नमोस्तु न जातु बिभेमि (5)
प्रोदति-सत्य-विबोध-मरीचि, प्रोक्षित-विश्व-पदार्थ-स तत्त्वः।
भाव-परामृत-निर्भर-पूर्णे, त्वय्यहम्-आत्मनि निर्वृतिम्-एमि (6)
मानस-गोचरम्-एति यदैव, क्लेश-दशा-अतनुताप-विधात्री। नाथ
मम त्वत्-अभेदस्तोत्र-परामृत-वृष्टिरु-देति (7)
शंकर सत्यम्-इदं व्रत-दान, स्नान तपो भवताप विनाशि।
तावक-शास्त्र-परामृत-चिन्ता, सिध्यति चेतसि निर्वृतिधारा (8)
नृत्यति गायति हृष्यति गाढं, संवित्-इयं मम भैरवनाथ। त्वां
प्रियम्-आप्य सुदर्शनम्-एकं, दुर्लभम्-अन्य-जनैः समयज्ञम् (9)
वसु-रस-पौषे कृष्ण दशम्याम्, अभिनवगुप्तः स्तवम्-इमम्-अकरोत्।
येन विभुर्-भव-मरु-सन्तापं, शमयति झट-इति जनस्य
दयालुः (10)

इति अभिनवगुप्ताचार्य-कृता शिवचामरस्तुतिः

## शिवचामरस्तुति (2)

अतिभीषण-कटु-भाषण, यम किंकर-पटली, कृत-ताड़न-
परिपीडन-मरणा-गम-समये। उमया सह मम चेतसि यमशासन
निवसन् शिवशंकर हर मे हर दुरितम् (1)
अति-दुर्नय-चटुलेन्द्रिय-रिपु-सञ्चय दलिते, पवि-कर्कश-पटु-
जल्पित-खल गर्हण'चलिते। शिवया सह मम चेतसि शशि-शेखर
निवसन्। शिवशंकर शिवशंकर हर मे हर दुरितम् (2)
भवभञ्जन सुररञ्जन खलवञ्चन पुरहन् दनुजान्तक मदनान्तक
रविजा-न्तक भगवन्। गिरिजा-वर करुणा-कर परमेश्वर भय-हन्।
शिव शंकर शिवशंकर हर मे हर दुरितम् (3)
शक्र-शासन कृतशासन चतुर्-आश्रम-विषये कलि-विग्रह-भव-
दुर्-ग्रह-रिपु-दुर्बल-समये।

द्विज-क्षत्रिय-वनिता-शिशुदर-कम्पित हृदये। शिवशंकर शिवशंकर हर मे हर दुरितम् (4)
भव-सम्भव-विविधा-मय-परिपीडित-वपुषं, दयितात्मज-ममता-भर-कलुषी-कृत-हृदयम्। कुरु मां निज-चरणार्चन-निरतं भव सततं, शिव शंकर शिवशंकर हर मे हर दुरितम् (5)

# शिव-महिम्न-स्तोत्रम्

पुष्प-दन्त उवाच

महिम्नः पारं-ते परम-विदुषो यद्य-सदृशी
स्तुतिर्-ब्रह्मादीनाम्-अपि तद-वसन्नाः-त्वयि गिरः।
अथा-वाच्यः सर्वः स्वमति-परिणामा-वधि गृणन्
ममा-प्येष-स्तोत्रे हर ! निर्-अपवादः परिकरः (1)
अतीतः पन्थानं तव च महिमा वाङ्-मनोसयोर्-
अतत्-व्यावृत्त्या यं चकितम्-अभिधते श्रुतिर् अपि।
स कस्य-स्तोतव्यः कतिविध-गुणः कस्य विषयः
पदे-त्वा-र्वाचीने पतति न मनः कस्य न वचः (2)
मधु-स्फीता वाचः परमम्-अमृतं निर्मितवतः
तव ब्रह्मन्-किं वाक्-अपि सुरगुरो-र्विस्मय-पदम्।
मम त्वेतां वाणीं गुण-कथन-पुण्येन भवतः
पुनामी-त्यर्थेऽस्मिन्-पुर-मथन ! बुद्धि-र्व्यवसिता (3)
तवैश्वर्यं-यत्-तत्-जगत-उदय-रक्षा-प्रलय-कृत्
त्रयी-वस्तु व्यस्तं तिसृषु गुण-भिन्नासु तनुषु।
अभव्यानाम्-अस्मिन्-वरद रमणीयाम्-अरमणीम्
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः (4)

किम्-ईहः किं कायः स खुल किमुपायः-त्रिभुवनम्
किम्-आधारो धाता सृजाति किम्-उपादन-इति च
अतर्क्यै-श्वर्य्ये त्व-य्यन-वसर दुःस्थो-हतधियः
कुतर्कोऽयं कान्-चित्-मुखरयति मोहाय जगतः (5)
अजन्मानो-लोकाः किम्-अवयव-वन्तोपि जगताम्
अधिष्ठातांर किं भव-विधिर्-अनादृत्य भवति।
अनीशो वा कुर्यात् भुवन-जनने कः परिकरो।
यतो मन्दाः-त्वां प्रत्यमरवर ! संशोत इमे (6)
त्रयी सांख्यं योगः पशुपति-मतं वैष्णवम्-इति
प्रभिन्ने प्रस्थाने परम्-इदम-अदः पथ्यम्-इति-च।
रुचीनां वैचित्र्यात्-ऋजु-कुटिल-नाना-पथ जुषाम्
नृणाम्-एको गम्यः-त्वमसि पयसाम्-अर्णव इव (7)
महोक्षः खट्वांगं परशुर्-अजिनं भस्म फणिनः
कपालं चे ते यत्-तव वरद। तन्त्रोपकरणम्।
सुराः-तां ताम्-ऋद्धिं दधति तु भवत्-भ्रूप्रणिहितां
नहि स्वात्मा रामं विषय-मृग-तृष्णा भ्रमयति (8)
ध्रुवं कश्चित्-सर्वं सकलम्-अपरस्त्व-ध्रुवम्-इदं
परो ध्रौव्या ध्रौव्ये जगति गदति व्यस्त विषये।
समस्ते प्ये-तिस्मन्-पुरमथन ! तै र्विस्मित इव
स्तुवन्-जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता (9)
तवै-श्वर्यं यत्नात् यत्-उपरि विरचि-हरिर्-अधः
परिच्छेतुं यातौ-अनलम्-अनलस्कन्ध-व पुषः।

ततो भक्ति-श्रद्धा-भर-गुरु-गृणत्-भ्यां गिरिश ! यत
स्वयं तस्थे ताभ्यां तव किम्-अनुवृत्ति-र्न फलति (10)
अयत्नात्-आपद्य त्रिभुवनम्-अवैर-व्यतिकरम्
दशास्यो यत्-बाहून-अभृत रण कण्डू-पर-वशान्
शिरः पद्म-श्रेणी-रचित-चरणाम्भोरुह-बलेः
स्थिरायास्त्व्-भक्तेः-त्रिपुर-हर ! विस्फूर्जितम्-इदम् (11)
अमुष्य त्वत्-सेवा-सम्-अधिगत-सारं भुजवनम्
बलात्-कैलासेपि त्वत-अधि-वसितौ विक्रम-यतः।
अलभ्यः-पाताले-प्यलस-चलितांगुष्ठ-शिरसि
प्रतिष्ठा-त्वयासीत्-ध्रुवम्-उपचितो मुह्यति खलः (12)
यत्-ऋद्धिं सुत्राम्णो वरद ! परमोचैर्-अपि सतीम्
अधश्चक्रे बाणः परिजन-विधेय-त्रिभुवनः।
न तत्-चितं तस्मिन् वरि-वसितरि त्वत्-चरणयोः
न कस्या-प्युन्नत्यै भवति शिर-सस्त्वय्य-वनतिः (13)
अकाण्ड-बह्माण्ड-क्षय-चकित-देवा-सुर-कृपा
विधेयस्यासीत्-यस्त्रिनयन विषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रयम्-अहो
विकारोपि श्लाध्यो भुवन-भय-भंग-व्यसनिनः (14)
असिद्धार्था नैव क्वचित्-अपि सदेवा-सुर-नरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्-ईश त्वाम्-इतर-सुर-साधारणम्-अभूत
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः (15)

महो पादाघातात्-व्रजति सहसा संशयपदम्
पदं विष्णोर्-भ्राम्यत्-भुज-परिघ-रुग्ण-ग्रह-गणम्।
महुर्-द्यौर्-दौस्थ्यं यात्यनि-भृत-जटा-ताडित-तटा
जगत्-रक्षायै त्वं नटसि ननु वामैव विभुता (16)
वियत्-व्यापी तारागण-गुणित-फेनोत्-गम-रुचिः
प्रवाहो वारां यः पृषत-लघु-दृष्टः शिरसि ते।
जगत्-द्वीपाकारं जलधि-वलयं तेन कृतमि-
त्यनेनैव-वोन्नेयं धृत-महिम दिव्यं तव वपुः (17)
रथः क्षोणी यन्ता शतधृतिर्-आगेन्द्रो धनु-रथो
रथांगे चन्द्रार्को रथ-चरण-पाणिः शर इति।
दिधक्षोस्ते कोयं त्रिपुर-तृणम्-आडम्बर-विधिः
विधेयैः क्रीडन्त्यो न खलु-परतन्त्रताः प्रभुधियः (18)
हरिस्ते साहस्त्रं कमल-बलिम्-आधाय पदयोः
यत्-एकोने तस्मिन्-निजम्-उदहरत्-नेत्र-कमलम्।
गतो भक्त्युद्रेकः परिणतिम्-असौ च-क्रवपुषा
त्रयाणां रक्षायै त्रिपुर-हर। जागर्ति जगताम् (19)
क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां सम्प्रक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्धवा दृढपरिकरः कर्मसुजनः (20)
क्रियादक्षो दक्षः क्रतुपतिर्-अधीशस्तनु-भृताम्-
ऋषीणाम्-आर्त्विज्यं शरणद ! सदस्याःसुरगणाः

कृतुभ्रंशस्त्वतः क्रतुफल-विधान-व्यसनिनो
ध्रुवं-कर्तुः श्रद्धा-विधुरम्-अभिचाराय हि मरवाः (21)
प्रजानाथं नाथ ! प्रसभम्-अभिकं स्वां दुहितरं
गतं रोहित्-भूतां रिर-मयिषम्-ऋष्यस्य वपुषा
धनुष्पाणे-र्यातं दिवम्-अपि सपत्रा-कृतम्-अमुम्
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याध-रभसः (22)
अपूर्वं लावण्यं विवसन-तनोस्ते-विमर्शतां
मुनीनां दाराणं समजनि सकोप-व्यतिकरः
यतो-भग्ने गुह्येसकृत्-अपि सपर्यां विदधतां
ध्रुवं-मोक्षोऽश्लीलं किम्-अपि पुरुषार्थ-प्रसवि ते (23)
स्वलावण्या-शंसा-धृत-धनुषम्-अह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुर-मथन ! पुष्पायुधम्-अपि।
यदि स्त्रैणं-देवी यम-निरत-देहार्ध-घटनात्
अवैति-त्वाम्-अद्धा-वत-वरद ! मुग्धा युवतयः (24)
श्मशोनेष्वा-क्रीडा स्मर-हर ! पिशाचाः सहचराः
चिता-भस्मा-लेपः सृक्-अपि नृकरोटी परि-करः।
अमंगल्यं शीलं तव भवतु नामैवम्-अखिलं
तथापि स्मर्तृणां वरद ! परमं मंगलम्-असि (25)
मनः प्रत्यक्-चित्ते सविधम्-अभिधायात्त मरुतः
प्रहृष्यत्-रोमाणः प्रमद-सलिलोत्-संगति-दृशः।
यदा-लोक्या-ह्लादं हृद इव निमज्ज्या-मृतमये
दध-त्यन्त-स्तत्त्वं किम्-अपि यमिनस्तत्-किल-भवान् (26)

त्वम्-अर्क-स्त्वं सोम-स्त्वम्-असि पवन स्त्वं हुतवहः
त्वम्-आप-स्त्वं व्योम-त्वमु-धरणिर्-आत्मा त्वमिति च।
परि-च्छिन्नामेवं त्वयि परिणता बिभ्रति गिरम्
न विद्मस्तत्-तत्त्वं वयमिह तु यत्-त्वं न भवसि (27)
त्रयीं तिस्रो वृत्ती-स्त्रिभुवनम्-अथो त्रीन्-अपि सुरान्
अकाराद्यै-वर्णै-स्त्रिभिर्-अभि-दधत्तीर्ण-विकृति।
तुरीयं ते धाम ध्वनिभिर्-अवरुन्धानम्-अणुभिः
समस्त व्यस्तं त्वां शरणद ! गृणा-त्योमिति-पदम् (28)
भवः शर्वो रुद्रः पशुपतिर्-अथोग्रः सह-महान्
तथा भीमेशानौ-इति यत्-अभिधाना-ष्टकम्-इदम्
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिर्-अपि
प्रिया-यास्मै-धाम्ने-प्रणिहित-नमस्योस्मि भवते (29)
वपुष्प्रादु-र्भावात्-अनुमितम्-इदं जन्मनि पुरा
पुरारे ! नैवाहं क्वचित-अपि भवन्तं प्रणतवान्।
नमन्-मुक्तः सम्प्र-त्यतनुर्-अहम-अग्रे-प्यनतिमान्
महेश ! क्षन्तव्यं तत्-इदम्-अपराध-द्वयम्-अपि (30)
नमो नेदिष्ठाय प्रियदव ! दविष्ठाय च नमः
नमः क्षोदिष्ठाय स्मर-हर ! महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन ! यविष्ठाय च नमः
नमः सर्वस्मै ते तत्-इदम्-इति शर्वाय च नमः (31)
बहल-रजसे विश्वो-त्पत्तौ भवाय नमो नमः
प्रबल-तमसे तत् संहारे-हराय नमोनमः

जनसुख-कृते सत्त्वो-द्रिक्तौ मृडाय नमोनमः
प्रमहसि पदे नि-स्त्रैगुण्ये-शिवाय नमोनमः (32)
कृश-परिणति चेतः क्लेश-वश्यं क्वचेदम्
क्व च तव गुण-सीमो-ल्लंघिनी शश्वत्-ऋद्धिः।
इति चहितम्-अमन्दीकृत्य मां भक्तिराधात्
वरद ! चरण्योस्ते वाक्य-पुष्पोप-हारम् (33)
श्री पुष्पदन्त-मुखं-पंकज निर्गतेन
स्तोत्रेण किल्विष-हरेण हर-प्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपति-र्महेशः (34)

इत्येषा वाङ्-मयी पूजा श्रीमत्-शंकर-पादयोः
अर्पिता तेन मे देवः प्रीयतां च सदाशिवः।

ॐ शान्तिः शान्तिः शान्तिः

# शिवजी की आरती

शिवोहं शिवोहं शिवोहं शिवोहं
सर्व विश्व का जो परमात्मा है,
सभी प्राणियों की वही आत्मा है।
वही आत्मा सच्चिदानन्द मैं हूँ,
शिवोहं शिवोहं शिवोहं शिवोहं।।
जिसे शस्त्र काटे न अग्नि जलावे
न पानी गलावे न मृत्यु मिटावे।
वही आत्मा सच्चिादानन्द मैं हूँ
शिवोहं शिवोहं शिवोहं शिवोहं।।
अजर और अमर जिस को वेदों ने गाया
यही ज्ञान अर्जुन को हरि ने सुनाया।
अमर आत्मा है मरण शील काया
सभी प्राणियों के जो घट में समाया।
वही आत्मा सच्चिदानन्द मैं हूँ
शिवोहं शिवोहं शिवोहं शिवोहं।।
है तारी से तारों में प्रकाश जिस का
है चन्द्र व सूर्य में है वास जिस का
वही आत्मा सच्चिदानन्द मैं हूँ
शिवोहं शिवोहं शिवोहं शिवोहं।।

## हमारे प्रकाशन

# कर्मकाण्ड दीपक (हिन्दी में)

(जिस में हर प्रकार की पूजा लिखी हुई है जैसे धूपदीप, विष्णु पूजन प्रेप्युन, शिवपूजा, दिवचखीर पूजा, यक्षामावसी पूजा, जन्म दिन पूजा, बुनियाद मकान पूजा, ग्रह प्रवेश पूजा, दीपमाला पूजा, श्राद्ध संकल्प विधि, पंचगव्य बनाने की विधि, पन्नपूजा विधि, पन्नकथा, रुद्र मन्त्र चमानुवाक्य, शिवरात्रि पूजा, शिवमहिम्नस्तोत्र)

**पंचस्तवी** *(अर्थ तथा व्याख्या सहित)*

**भवानी सहस्त्रनाम**

**महिम्नस्तोत्र** *(अर्थ तथा व्याख्या सहित)*

**शिवरात्रि पूजा**

**सन्धया**

**सहस्रनामावली, (विष्णु, शिव, गणेश, सूर्य, भवानी, शरिका, ज्वाला, महाराज्ञी)**

**राम गीता**

**श्रीमत् भगवद्गीता**

**अन्तिम संस्कार विधि**

**शारदा प्राईमर**

## विजयेश्वर कैसट्स

'स्व० प्रेमनाथ शास्त्री' की ज़बान से

★ गीता प्रवचन (11 कैसटों में) ★ लल्ल वाक्य (7 कैसटों में) ★ महिम्नापार (3 कैसटों में) ★ जगद्धर भट्ट के विलाप ★ परमानन्द ★ राम गीता ★ अन्तिम संस्कार विधि ★ शिव रात्रि पूजा ★ भवानी सहस्रनाम ★ नित्य नियम विधि ★ पंचस्तवी ★ भगवत् गीता ★ दुर्गा सप्तशती ★ पोष पूजा तथा लग्न संस्कार

# हमारी पुस्तकें मिलेंगी

**KASHMIRI SAMITI**
*Kashmir Bhawan Marg, Amar Colony, Lajpat Nagar-IV, New Delhi, Ph. : 6433399, 6465280*

**TANEJA ELECTRONICS & TENT HOUSE**
*Kashmiri Catering & Decurators Raghunath Mandir, Amar Colony, Lajpat Nagar, New Delhi Phone : 6429046*

**BRAHAM PUTRA COMPLEX**
*Shop No. 45, Sector-29, NOIDA Ph. : 8539338*

**D. P. B. PUBLICATIONS**
*110, Chowk Barshahbulla, Chawri Bazar, Delhi-6 Phone : 3273220*

**VIJAYASHWAR DHARMIK PUSTAK BHANDAR**
*Talab-Tilo, Jammu, Phone : 555763*

**J. K. BOOK SHOP**
*Talab-Tilo, Jammu, Phone : 554522*

**VEER HOUSE**
*Sarwal Chowk, Jammu*

**GUPTA STATIONERY STORE**
*City Chowk, Jammu*

**NAND LAL & SONS**
*Pacca Danga, Jammu*

**TRINITY STATIONERS**
*Pacca Danga, Jammu*

**KIRAN STATIONERY STORE**
*Gandhi Nagar, Jammu*

**AMAR STATIONERY STORE**
*Gandhi Nagar, Jammu*

**SANJAY STATIONERY STORE**
*Rehadi, Jammu*

**BHARAT PUSHTKALYA**
*Jewel Chowk, Jammu*

**VIRENDER BOOK STALL**
*Canal Road, Jammu*

**UNIVERSAL NEWS AGENCIES**
*Mukherjee Bazar, Udhampur*

**AJU BOOK CENTER**
*Gandhi Nagar, Jammu*

# विजयेश्वर कैसट्स तथा प्रकाशन

## स्व. प्रेम नाथ शास्त्री की ज़बान से




**विजयेश्वर प्रकाशन**
अजीत कालोनी
गोल गुजराल जम्मू
Ph. : 555607